आलंकारिकदृष्ट्या त्रीणि महाकाव्यलक्षणानि

Submitted by – Sudip Chakravortti

1. साहित्यदर्पण के अनुसार महाकाव्य के लक्षण–

सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः।
सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः॥
एकवंशभवा भूपाः कुलजा बहवोऽपि वा।
शृङ्गारवीरशान्तानामेकोऽङ्गीरस इष्यते॥
अङ्गानि सर्वेऽपि रसाः सर्वे नाटकसन्धयः।
इतिहासोद्भवं वृत्तमन्यद् वा सज्जनाश्रयम्॥
चत्वारस्तत्र वर्गाः स्युतेष्वकञ्च फलं भवेत्।
आदौ नमस्क्रियाऽऽशीर्वाद वस्तुनिर्देश एव वा॥
क्वचिन्निदा खलादीनां सतां च गुणकीर्तनम्।
एकवृत्तमयैः पद्यैरवसानेऽन्यवृत्तकैः॥
नातिस्वल्पा नातिदीर्घाः सर्गा अष्टाधिका इह।
नानावृत्तमयः क्वापि सर्गः कश्चन दृश्यते॥
सर्गान्ते भाविसर्गस्य कथायाः सूचनं भवेत्।
सन्ध्यासूर्येन्दुरजनीप्रदोषध्वान्तवासराः ॥
प्रातर्मध्याह्नमृगयाशैलर्तुवनसागराः ।
सम्भोगविप्रलम्भौ च मुनिस्वर्गपुराध्वराः॥
रणप्रयाणोपयममन्त्रपुत्रोदयादयः ।
वर्णनीया यथायोगं साङ्गोपाङ्गा अमी इह॥
कवेवृत्तस्य वा नाम्ना नायकस्येतरस्य वा।
नामास्यसर्गोपादेयकथया सर्गनाम तु।
अस्मिन्नार्षे पुनः सर्गा भवन्त्याख्यानसंज्ञकाः॥ सा. द. 6.315–25

2. काव्यादर्शे -

सर्गबन्धो महाकाव्यमुच्यते तस्य लक्षणम्।
आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्॥
इतिहासकथोद्भूतमितरद्वासदाश्रयम् ।
चतुर्वर्ग–फलायन्तं चतुरोदात्त नायकम्॥
नगरार्णवकौलर्तुचन्द्रार्कोदाय वर्णनैः।
उद्यान–सलिल–क्रीडा – मधुपान–रतोत्सवैः।

आलंकारिकदृष्ट्या त्रीणि महाकाव्यलक्षणानि

Submitted by – Sudip Chakravortti

विप्रलम्भैर्विवाहैश्च कुमारोदयवर्णनैः।
मन्त्रदूतप्रयाणाजिनायकाभ्युदयैरपि ।।
अलंकृतमसंक्षिप्तं रसभावनिरन्तरम्।
सर्गैरनतिविस्तीर्णैः श्रव्यवृत्तैः सुसन्धिभिः।।
सर्वत्र भिन्नवृतान्तैरुपेतं लोकरंजकम्।
काव्यं कल्पान्तरस्थायि जायेत सदलंकृति।।

अग्निपुराण में महाकाव्य के लक्षण :

सर्गबन्धो महाकाव्यामारब्धं संस्कृतेन यत्।
तादात्म्यजहत्तत्र तत्समं नातिदुष्यति।।
इतिहासकथोद्भूतमितरद् वा सदाश्रयम्।
मन्त्रदूत-प्रयाणाजिनियतं नातिविस्तरम्।।
शक्वर्यातिजगत्यातिशक्वर्या त्रिष्टुप् तथा।
पुष्पिताग्रादिभिववत्रभिजनैश्चारुभिः समैः।।
युक्तातु भिन्नवृत्तान्ता नातिसंक्षिप्त-सर्गकम्।
अतिशक्वरी काष्ठभ्यामेक संकीर्णकैः परः।।
मात्रयाप्यपरः सर्गः प्राज्ञस्त्येषु च पश्चिमः।
कल्पोतिनिन्दितस्तस्मिन्विशेषानादरः सताम्।।
नगरार्णवशैलर्तुचन्द्रार्काश्रमपादपैः ।
उद्याने- सलिल - क्रीडा - मधुपानरतोत्सवैः।।
दूतीवचन-विन्यासैरसती चरिताद्भुतैः।
तमसा नरुताप्यन्यैर्विभावै रतिनिर्भरैः।।
सर्ववृत्ति प्रवृत्तं च सर्वभावप्रभावितम्।
सर्वरीतिरसैः स्पृष्टं पुष्टं गुणविभूषणैः।।
अतएव महाकाव्यं तत्कर्ता च महाकविः।
वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितम्।।
पृथक् प्रयत्नं निर्वर्त्य वाग्विक्रमाणि रसाद्वपुः।
चतुर्वर्गफलं विष्वग्व्याख्यातं नाटकाख्यया।। अ. पु.337